# shrI uchChiShTamahAgaNapati dhyAnam

# શ્રીઉચ્છિષ્ટમહાગણપતિ ધ્યાનમ્

## Document Information

Text title : uchChiShTamahAgaNapatidhyAnam

File name : uchChiShTamahAgaNapatidhyAnam.itx

Category : ganesha, stotra, dhyAnam

Location : doc_ganesha

Author : Sri Harsha Ramamurthy (Harshananda?)

Transliterated by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Proofread by : Malleswara Rao Yellapragada malleswararaoy at yahoo.com

Description-comments : http://www.kamakotimandali.com/stotra/stotra_index.html

Latest update : July 12, 2012

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

shrI uchChiShTamahAgaNapati dhyAnam

# શ્રીઉચ્છિષ્ટમહાગણપતિ ધ્યાનમ્

મૂલાધારે સુયોન્યાખ્યે ચિદગ્નિવરમણ્ડલે ।
સમાસીનં પરાશક્તિવિગ્રહં ગણનાયકમ્ ॥ ૧॥

રક્તોત્પલસમપ્રખ્યં નીલમેઘસમપ્રભમ્ ।
રત્નપ્રભાલસદ્દીપ્તમુકુટાઞ્ચિતમસ્તકમ્ ॥ ૨॥

કરુણારસસુધાધારાસ્રવદક્ષિત્રયાન્વિતમ્ ।
અક્ષિકુક્ષિમહાવક્ષઃ ગણ્ડશૂકાદિભૂષણમ્ ॥ ૩॥

પાશાઙ્કુશેક્ષુકોદણ્ડપઞ્ચબાણલસત્કરમ્ ।
નીલકાન્તિઘનીભૂતનીલવાણીસુપાર્શ્વકમ્ ॥ ૪॥

સુત્રિકોણાખ્યનીલાઙ્ગરસાસ્વાદનતત્પરમ્ ।
પત્ન્યાલિઙ્ગતવામાઙ્ગં સપ્તમાતૃનિષેવિતમ્ ॥ ૫॥

બ્રહ્મવિષ્ણુમહેન્દ્રાદિસમ્પ્રપૂજિતપાદુકમ્ ।
મહદ્દ્વયપદોવાચ્યપાદુકામન્ત્રસારકમ્ ॥ ૬॥

નવાવરણયજ્ઞાખ્ય વરિવસ્યાવિધિપ્રિયમ્ ।
પઞ્ચાવરણયજ્ઞાખ્ય વિધિસમ્પૂજ્યપાદુકમ્ ॥ ૭॥

અખણ્ડકોટિબ્રહ્માણ્ડામણ્ડલેશ્વરમવ્યયમ્ ।
રદનાક્ષરસમ્પૂર્ણમન્ત્રરાજસ્વરૂપિણમ્ ॥ ૮॥

ગિરિવ્યાહૃતિવર્ણાત્મમન્ત્રતત્વપ્રદર્શકમ્ ।
અરુણારુણતનુચ્છાયમહાકામકલાત્મકમ્ ॥ ૯॥

મહાગોપ્યમહાવિદ્યા પ્રકાશિતકલેવરમ્ ।
ચિચ્છિવં ચિદ્ભવં શાન્તં ત્રિગુણાદિવિવર્જિતમ્ ॥ ૧૦॥

અષ્ટોત્તરશતાભિખ્યકલાન્યાસવિધિપ્રિયમ્ ।
ચિદાકારમહાદ્વીપમધ્યવાસસુવિગ્રહમ્ ॥ ૧૧॥

ચિદબ્ધિમથનોત્પન્નચિત્સારઘનવિગ્રહમ્ ।
વાચામગોચરં શાન્તં શુદ્ધચૈતન્યરૂપિણમ્ ॥ ૧૨॥

મૂલકન્દસ્થચિદ્દેશનવતાણ્ડવપણ્ડિતમ્ ।
ષડમ્બુરુહસંસ્થાયિપરચિદ્વ્યોમભાસુરમ્ ॥ ૧૩॥

અકારાદિક્ષકારાન્તવર્ણલક્ષિતચિત્સુખમ્ ।
અકારાક્ષરનિર્દિષ્ટપ્રકાશમયવિગ્રહમ્ ॥ ૧૪॥

હકારાખ્યવિમર્શાત્મપ્રભાદીપ્તજગત્ત્રયમ્ ।
મહાહંસજપધ્યાનવિધિજ્ઞાતસ્વરૂપકમ્ ॥ ૧૫॥

સદોદિતમહાપ્રજ્ઞાકારં સંસારતારકમ્ ।
મોક્ષલક્ષ્મીપ્રદાતારં કાલાતીતમહાપ્રભુમ્ ॥ ૧૬॥

નામરૂપાદિસમ્ભિન્નનિત્યપૂર્ણચિદુત્તમમ્ ।
પ્રત્યગ્ભૂતમહાપ્રજ્ઞાગાત્રગોચરવિગ્રહમ્ ॥ ૧૭॥

મહાકુણ્ડલિનીરૂપં ષટ્ચક્રનગરેશ્વરમ્ ।
અપ્રાકૃતમહાદિવ્યચૈતન્યાત્મસ્વરૂપિણમ્ ॥ ૧૮॥

નાદબિન્દુકલાતીતં કાર્યકારણવર્જિતમ્ ।
ષડમ્બુરુહચક્રાન્તઃ સ્ફુરત્સૌદામિનીપ્રભમ્ ॥ ૧૯॥

તત્ત્વમસ્યાદિવાક્યાર્થપરિબોધનપણ્ડિતમ્ ।
બ્રહ્માદિકીટપર્યન્તવ્યાપ્તસંવિત્સુધારસમ્ ॥ ૨૦॥

ઇચ્છાજ્ઞાનક્રિયાનન્દસર્વતન્ત્ર સ્વતન્ત્રિણમ્ ।
હૃદયગ્રન્થિભિદ્વિદ્યાદર્શનોત્સુકમાનસમ્ ॥ ૨૧॥

પઞ્ચકૃત્યપરેશાનં મહાત્રૈપુરવિગ્રહમ્ ।
શ્રીચક્રરાજમધ્યસ્થશૂન્યગ્રામમહેશ્વરમ્ ॥ ૨૨॥

બ્રહ્મવિદ્યાસ્વરૂપશ્રીલલિતારૂપધારિણમ્ ।
વશિન્યાદ્યાવૃતં સાધ્યં અદ્વયાનન્દવર્ધનમ્ ॥ ૨૩॥

આદિશઙ્કરરૂપેશદક્ષિણામૂર્તિપૂજિતમ્ ।
અસંસ્પૃષ્ટમહાપ્રજ્ઞાભિખ્યાદ્વૈતસ્થિતિપ્રભમ્ ॥ ૨૪॥

એવં સઞ્ચિતયેદ્દેવં ઉચ્છિષ્ટગણનાયકમ્ ।
નીલતારાસમેતં તુ સચ્ચિદાનન્દવિગ્રહમ્ ॥ ૨૫॥

This is a Dhyana that was composed by Shri Harsha Ramamurthy.
The Upasana, significance and secret of Shri Ucchishta Mahaganapathi
are known to very few advanced Sadhakas.

Encoded and proofread from the source document at www.kamakotimandali.com
by YV Malleswara Rao malleswararaoy at yahoo.com

*shrI uchChiShTamahAgaNapati dhyAnam*
pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*